www.shaivam.org

# चन्द्रमौलीश्वर वर्णमाला स्तुतिः

श्रीपतिप्रमुखादेवाः स्वेप्सितार्थस्य सिद्द्ये ।
यं स्तुवन्ति समर्चन्ति नमन्ति च भजामि तं ॥ १ ॥
चंचच्चन्द्रकलाचूडः चन्द्रिकाधवलः शिवः ।
प्रत्यञ्चं स्फोरयत्याशु चञ्चले हृदये मम ॥ २ ॥
द्रवी भवति यस्यैव हृदयं स्मृतिमात्रतः ।
द्रप्सवन्मधुरां वाचां दृढयत्वनिशं स नः ॥ ३ ॥
मौले मन्दाकिनि यस्य मालती मालिका निभा ।
मौनिमानसहंसोऽयं मौढ्यं हरतु नः शिवः ॥ ४ ॥
लीनं योगिमनो यत्र तथा जगदपि ध्रुवे ।
लीढं मज्जिह्वया नित्यं करोतु नीजनाम सः ॥ ५ ॥
स्वस्तना नैव विषया दुःखसंभिन्नसौख्यदाः ।
ज्ञात्वाप्यैवं तत्र सक्तं मुक्तिमार्गाध्वगं कुरु ॥ ६ ॥
रोदिमि क्क शुगामीढहृदयोऽहं दयानिधे ।
कस्याद्रमस्तु हृदयं त्वां विना मयि शङ्करः ॥ ७ ॥
विघ्नेश्वरगुहाश्लिष्टवामदक्षिणभाग भाक ।
विद्यां मे दिशतु ब्रह्मविषयां गिरिजापतिः ॥ ८ ॥
जपध्यानार्च्नस्तोत्रवन्दनैः सुरभूसुराः ।
यं तोषयन्ति सततं स शिवो नः प्रसीदतु ॥ ९ ॥
यतच्त्तैर्योगिवर्यैर्ध्यायमानपदाम्बुजम ।
यमभीतिविनाशाय याम्यहं शरणं शिवम ॥ १० ॥
तेनैव पाविता पृथ्वी तेनैव कुलमुद्धृतम ।
येन शंभो पदाम्भोजयुगले स्वार्पितं मनः ॥ ११ ॥
चन्द्रमौलीश्वरस्तोत्रं भक्त्या यः पठति प्रगे ।

तस्य श्रीचन्द्रमौलीशः काङ्क्षितानि प्रयच्छति ॥१२ ॥

www.shaivam.org